# Sutaproktam 2 Vasudevamahatmyam

# સૂતપ્રોક્તં ૨ વાસુદેવમાહાત્મ્યમ્

## Document Information

Text title : Sutaproktam 2 Vasudevamahatmyam

File name : sUtaproktaM2vAsudevamAhAtmyam.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, mAhAtmya

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 12/12/46-54||

Latest update : October 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# સૂતપ્રોક્તં ૨ વાસુદેવમાહાત્મ્યમ્

ઇતિ ચોક્તં દ્વિજશ્રેષ્ઠા યત્પૃષ્ટોઽહમિહાસ્મિ વઃ ।
લીલાવતારકર્માણિ કીર્તિતાનીહ સર્વશઃ ॥ ૪૬॥

પતિતઃ સ્ખલિતશ્ચાર્તઃ ક્ષુત્ત્વા વા વિવશો બ્રુવન્ ।
હરયે નમ ઇત્યુચ્ચૈર્મુચ્યતે સર્વપાતકાત્ ॥ ૪૭॥

સઙ્કીર્ત્યમાનો ભગવાનનન્તઃ
શ્રુતાનુભાવો વ્યસનં હિ પુંસામ્ ।
પ્રવિશ્ય ચિત્તં વિધુનોત્યશેષં
યથા તમોઽર્કોઽભ્રમિવાતિવાતઃ ॥ ૪૮॥

મૃષા ગિરસ્તા હ્યસતીરસત્કથા
ન કથ્યતે યદ્ભગવાનધોક્ષજઃ ।
તદેવ સત્યં તદુ હૈવ મઙ્ગલં
તદેવ પુણ્યં ભગવદ્ગુણોદયમ્ ॥ ૪૯॥

તદેવ રમ્યં રુચિરં નવં નવં
તદેવ શશ્વન્મનસો મહોત્સવમ્ ।
તદેવ શોકાર્ણવશોષણં નૃણાં
યદુત્તમશ્લોકયશોઽનુગીયતે ॥ ૫૦॥

ન તદ્વચશ્ચિત્રપદં હરેર્યશો
જગત્પવિત્રં પ્રગૃણીત કર્હિચિત્ ।
તદ્ધ્વાઙ્ક્ષતીર્થં ન તુ હંસસેવિતં
યત્રાચ્યુતસ્તત્ર હિ સાધવોઽમલાઃ ॥ ૫૧॥

સ વાગ્વિસર્ગો જનતાઘસમ્પ્લવો
યસ્મિન્ પ્રતિશ્લોકમબદ્ધવત્યપિ ।
નામાન્યનન્તસ્ય યશોઽઙ્કિતાનિ ય-

શ્રૃણ્વન્તિ ગાયન્તિ ગૃણન્તિ સાધવઃ ॥ ૫૨॥

નૈષ્કર્મ્યમપ્યચ્યુતભાવવર્જિતં
ન શોભતે જ્ઞાનમલં નિરઞ્જનમ્ ।
કુતઃ પુનઃ શશ્વદભદ્રમીશ્વરે
ન હ્યર્પિતં કર્મ યદપ્યનુત્તમમ્ ॥ ૫૩॥

યશઃ શ્રિયામેવ પરિશ્રમઃ પરો
વર્ણાશ્રમાચારતપઃશ્રુતાદિષુ ।
અવિસ્મૃતિઃ શ્રીધરપાદપદ્મયો-
ર્ગુણાનુવાદશ્રવણાદિભિર્હરેઃ ॥ ૫૪॥

અવિસ્મૃતિઃ કૃષ્ણપદારવિન્દયોઃ
ક્ષિણોત્યભદ્રાણિ શમં તનોતિ ચ ।
સત્ત્વસ્ય શુદ્ધિં પરમાત્મભક્તિં
જ્ઞાનં ચ વિજ્ઞાનવિરાગયુક્તમ્ ॥ ૫૫॥

યૂયં દ્વિજાગ્ર્યા બત ભૂરિભાગા
યચ્છશ્વદાત્મન્યખિલાત્મભૂતમ્ ।
નારાયણં દેવમદેવમીશ-
મજસ્રભાવા ભજતાઽઽવિવેશ્ય ॥ ૫૬॥

અહં ચ સંસ્મારિત આત્મતત્ત્વં
શ્રુતં પુરા મે પરમર્ષિવક્ત્રાત્ ।
પ્રાયોપવેશે નૃપતેઃ પરીક્ષિતઃ
સદસ્યૃષીણાં મહતાં ચ શ‍ૃણ્વતામ્ ॥ ૫૭॥

એતદ્વઃ કથિતં વિપ્રાઃ કથનીયોરુકર્મણઃ ।
માહાત્મ્યં વાસુદેવસ્ય સર્વાશુભવિનાશનમ્ ॥ ૫૮॥

ય એવં શ્રાવયેન્નિત્યં યામક્ષણમનન્યધીઃ ।
(શ્લોકમેકં તદર્ધં વા પાદં પાદાર્ધમેવ વા ।)
શ્રદ્ધાવાન્ યોઽનુશ‍ૃણુયાત્પુનાત્યાત્માનમેવ સઃ ॥ ૫૯॥

દ્વાદશ્યામેકાદશ્યાં વા શ‍ૃણ્વન્નાયુષ્યવાન્ ભવેત્ ।
પઠત્યનશ્નન્ પ્રયતઃ તતો ભવત્યપાતકી ॥ ૬૦॥

પુષ્કરે મથુરયાં ચ દ્વારવત્યાં યતાત્મવાન્ ।

ઉપોષ્ય સંહિતામેતાં પઠિત્વા મુચ્યતે ભયાત્ ॥ ૬૧॥

દેવતા મુનયઃ સિદ્ધાઃ પિતરો મનવો નૃપાઃ ।
યચ્છન્તિ કામાન્ ગૃણતઃ શ‍ૃણ્વતો યસ્ય કીર્તનાત્ ॥ ૬૨॥

ઋચો યજૂંષિ સામાનિ દ્વિજોઽધીત્યાનુવિન્દતે ।
મધુકુલ્યા ઘૃતકુલ્યાઃ પયઃકુલ્યાશ્ચ તત્ફલમ્ ॥ ૬૩॥

પુરાણસંહિતામેતામધીત્ય પ્રયતો દ્વિજઃ ।
પ્રોક્તં ભગવતા યત્તુ તત્પદં પરમં વ્રજેત્ ॥ ૬૪॥

વિપ્રોઽધીત્યાપ્નુયાત્પ્રજ્ઞાં રાજન્યોદધિમેખલામ્ ।
વૈશ્યો નિધિપતિત્વં ચ શૂદ્રઃ શુધ્યેત પાતકાત્ ॥ ૬૫॥

કલિમલસંહતિકાલનોઽખિલેશો
હરિરિતરત્ર ન ગીયતે હ્યભીક્ષ્ણમ્ ।
ઇહ તુ પુનર્ભગવાનશેષમૂર્તિઃ
પરિપઠિતોઽનુપદં કથાપ્રસઙ્ગૈઃ ॥ ૬૬॥

તમહમજમનન્તમાત્મતત્ત્વં
જગદુદયસ્થિતિસંયમાત્મશક્તિમ્ ।
દ્યુપતિભિરજશક્રશઙ્કરાદ્યૈઃ
દુરવસિતસ્તવમચ્યુતં નતોઽસ્મિ ॥ ૬૭॥

ઉપચિતનવશક્તિભિઃ સ્વ આત્મનિ
ઉપરચિતસ્થિરજઙ્ગમાલયાય ।
ભગવત ઉપલબ્ધિમાત્રધામ્ને
સુરઋષભાય નમઃ સનાતનાય ॥ ૬૮॥

સ્વસુખનિભૃતચેતાસ્તદ્વ્યુદસ્તાન્યભાવો-
અપ્યજિતરુચિરલીલાકૃષ્ટસારસ્તદીયમ્ ।
વ્યતનુત કૃપયા યસ્તત્ત્વદીપં પુરાણં
તમખિલવૃજિનઘ્નં વ્યાસસૂનું નતોઽસ્મિ ॥ ૬૯॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દ્વાદશસ્કન્ધે
દ્વાદશાધ્યાયાન્તર્ગતં સૂતપ્રોક્તં વાસુદેવમાહાત્મ્યં
સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૨/૧૨/૪૬-૫૪॥

bhAgavatapurANa . adhyAya 12/12/46-54..

Proofread by PSA Easwaran

*Sutaproktam 2 Vasudevamahatmyam*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*